ॐ परमात्मने नमः ।

तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्न-
निरूपणाभ्यां ॥ १ ॥

द्वितीयेऽध्याये स्मृतिन्यायविरोधो वेदान्तविहिते ब्रह्मदर्शने परिहृतः, परपक्षाणाञ्चानपेक्षत्वं प्रपञ्चितं, श्रुतिविप्रतिषेधश्च परिहृतः, तत्र च जीवव्यतिरिक्तानि तत्त्वानि जीवोपकरणानि ब्रह्मणो जायन्त इत्युक्तं । अथेदानीमुपकरणोपहितस्य जीवस्य संसारगतिप्रकारस्तदवस्थान्तराणि ब्रह्मसतत्त्वं विद्याभेदाभेदौ गुणोपसंहारानुपसंहारौ सम्यग्दर्शनात् पुरुषार्थसिद्धिः सम्यग्दर्शनोपायविधिप्रभेदो मुक्तिफलानियमश्चेत्येत-

---

ॐ ब्रह्मणे नमः ।

यं हि वैराग्यसम्पन्नास्तत्त्वमर्थविवेकिनः ॥
लभन्ते साधनैर्दान्तास्तं सीतानायकं भजे ॥ १ ॥

तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्यां । वृत्तमनूद्य तृतीयाध्यायार्थमाह । द्वितीय इत्यादिना । अविरुद्धे वेदान्तार्थे तज्ज्ञानसाधनचिन्तावसर इत्यनयोर्हेतुहेतुमद्भावः । लिङ्गोपाधिसिद्धौ तदुपहितजीवसंसारचिन्तेति पादयोरपि तद्भावसङ्गतिः । अत्र प्रथमपादे वैराग्यं । द्वितीये त्वम्प्राप्यवस्थोक्ता त्वंपदार्थो ब्रह्मतत्त्वञ्चोच्यते । तृतीये वाक्यार्थस्तदर्थमुपासनाश्च विचार्यन्ते । चतुर्थपादार्थमाह । सम्यग्दर्शनादिति । दर्शनोपायाः सन्न्यासादयः । मुक्तिरूपफलस्य स्वर्ग-

Digitized by Google

